**दिनाङ्क :- 02.07.2025**

**प्रात: - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री-विदेशमन्त्रालयः**

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य घाना, त्रिनिदाद टोबैगो, अर्जेन्टिना, ब्राजील, नामिबिया इति पञ्चराष्ट्रानां यात्रायां भविष्यति। प्रधानमन्त्री पञ्चराष्ट्राणां यात्रायाः प्रथमे चरणे जुलाई मासस्य द्वितीय-तृतीय-दिनाङ्के घानादेशस्य यात्रां करिष्यति। एषा तस्य प्रथमा द्विपक्षीया घानादेशस्य यात्रा अस्ति। अत्रावसरे श्रीमोदी घानादेशस्य राष्ट्रपतिना सह वार्तालापं विधास्यति । द्वयोः राष्ट्रयोः सशक्तद्विपक्षीयसहभगितायाः समीक्षा भविष्यति सममेव आर्थिक, ऊर्जा, रक्षासहकार्यं, विकाससहकार्यसहभगितां च वर्धयितुं बहुविधचर्चा भविष्यति।

**मन्त्रिमण्डलस्य निर्णयाः**

केन्द्रीयमन्त्रिमण्डलेन सर्वक्षेत्रेषु वृत्तिसृजनमुद्दिश्य, सामाजिकसुरक्षां प्रदातुञ्च, विशेषावधानेन विनिर्माणक्षेत्रे वृत्ति-सम्बद्ध-प्रोत्साहन-योजना अनुमोदिता । ह्यः नवदेहल्यां मन्त्रिमण्डलस्य निर्णयानाम् विषये प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, प्रथमतया कार्यं कुर्वाणः कर्मचारिणः योजनान्तर्गतं एकमासस्य वेतनं पञ्चदश- सहस्ररूप्यकाणि यावच्च प्राप्स्यन्तीति। सः अवदत् यत् नियोक्तृभ्यः अतिरिक्त-वृत्युत्पादनार्थं वर्षद्वयं यावत् प्रोत्साहनं प्रदास्यते, अपि च विनिर्माणक्षेत्राय वर्षद्वयं यावत् विस्तृताः लाभाः दास्यन्ते इति।

योजनैषा प्रायः एकलक्ष-कोटिरूप्यकाणां वर्तते। इयं योजना वर्षेषु सार्धत्रि- कोटिरूप्यकाणां वृत्यै प्रोत्साहनं प्रदातुम् सन्नद्धा अस्ति।

**रक्षामन्त्री**

रक्षामन्त्री राजनाथ सिंह: अवोचत् यत् भयोत्पादनं विरुध्य प्रतिकारस्य अधिकार: भारतस्य अस्ति सममेव कस्यापि आक्रमणस्य निवारणस्य अधिकारः अस्ति इति। अमेरिकादेशस्य रक्षासचिवेन पीट् हेग्सेत् इत्यनेन सह दूरभाषया वार्तालापं कुर्वन् रक्षामन्त्री अवदत् यत्, आपरेशन्-सिन्दूर् इत्यभियाने भारतस्य कार्यं सुव्यवस्थितमासीत्। श्री. सिंहः , श्री. हेग्सेत् च भारत-अमेरिका-रक्षा-सहभागितां इतोऽपि गहनं कर्तुं, क्षमता-निर्माणक्षेत्रे सहयोगं सुदृढं कर्तुं च वर्तमानस्य नूतनस्य च उपक्रमाणां समीक्षार्थं चर्चां अकुरुताम् ।

**एन- एच- ए- आई/उ वेशनं**

आगामि-अमरनाथ-यात्रायाः तीर्थयात्रिणां कृते सुगम-यात्रा-अनुभवः सुनिश्चेतुं , भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरण- एन- एच- ए- आई इत्यनया संस्थया ह्यः जम्मू-कश्मीर्-प्रदेशयोः अधिकारिभिः सह वीडियो-कान्फ़रेन्सिङ्ग्-माध्यमेन समीक्षा-सभा आयोजिता। यात्रा-मार्गे स्थितस्य एन्. एच्.-44 इत्यस्य

अष्टविंशत्यधिक द्विशत किलोमीटर् दीर्घस्य जम्मू-श्रीनगर-खण्डस्य सर्वाणि खण्डानि विस्तृतरूपेण समीक्षितानि। सभाम् सम्बोधयन्, संस्थायाः अध्यक्ष: सन्तोशकुमार-यादवः अधिकारिभ्यः निर्देशं दत्तवान् यत् ते स्थानीयप्रशासनेन सह निकट-समन्वयेन कार्यं कुर्वन्तु अपि च यात्रायाः सज्जतायाः कृते तत्क्षणम् साहाय्यं यच्छतु इति ।

**टी-**20 **-क्रिकेट्**

महिलानां -टी-20 -क्रिकेट्-क्रीडायां, ब्रिस्टोल् इत्यत्र गतरात्रौ पञ्च-क्रीडा-श्रृङ्खलायाः द्वितीयायां स्पर्धायां भारतीयदलेन इ्ग्लेण्ड् दलं चतुर्विंशतिः धावनाङ्कै: पराजितम्। अमनजोत् कौर: क्रीडायां उत्तम् प्रदर्शनेन क्रीड़ा नायिकाया: उपाधिम् अवाप्नोत्।

अस्मिन् एव क्रमे तृतीया टी-20 अन्ताराष्ट्रिय-क्रीडा जुलाई मासस्य चतुर्थे दिनाङ्के केन्निङ्गटन्-ओवल्-क्रीडा क्षेत्रे भविष्यति।

**।। इति वार्ता:।।**